This Question Paper consists **42 questions and 8 printed pages**.
अस्मिन् प्रश्नपत्रे **42** प्रश्ना: एवम् **8** मुद्रित पृष्ठा: सन्ति।

**Roll No.**
**अनुक्रमाङ्क :**
**अङ्केषु**

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | | | | | | | | | |

**Code No.** **कूट सं.** **52/S/A/S**

**Set** **A**

# SANSKRIT
# संस्कृतम्
# (209)

**Day and Date of Examination**
**( परीक्षादिवसः दिनाङ्कश्च )** ______________________

**Signature of Invigilators** **1.** ______________________
**( निरीक्षकहस्ताक्षरद्वयम् )**
**2.** ______________________

---

**सामान्य अनुदेशाः :**

1. अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे अवश्यमेव लेखनीयः।
2. निरीक्ष्यताम् यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य शीर्षे मुद्रितसंख्यानुसारमेव अस्ति। प्रश्ना: क्रमानुसारमेव सन्ति।
3. वस्तुनिष्ठप्रश्नेषु (A), (B), (C) वा (D) विकल्पेषु कोऽपि एकं उत्तरं चित्वा पृथकरूपेण प्रदत्ते उत्तरपुस्तिकामध्ये लिखेत्।
4. वस्तुनिष्ठप्रश्नसहितं सम्पूर्णप्रश्नपत्रस्य उत्तराणि निर्धारितसमये एव लेखनीयानि।
5. उत्तरपुस्तिकायां परिचयचिह्नम् अथवा कुत्रापि निर्दिष्टस्थानेतरस्थलेषु अनुक्रमाङ्कलेखनं सर्वथा वर्जितम् अस्ति।
6. स्व-उत्तरपुस्तिकायां प्रश्नपत्रस्य कूट (कोड) संख्या **52/S/A/S-A** अवश्यं लेखनीया।

# SANSKRIT

# संस्कृतम्

# (209)

**समय : होरात्रयम् ]** **[ पूर्णाङ्काः – 100**

**निर्देशा :** (1) अस्मिन् प्रश्नपत्रे **द्विचत्वारिंशत्** प्रश्नाः ।

(2) प्रत्येकं प्रश्नस्य समक्षम् अङ्काः सूचिताः।

(3) **सर्वे** प्रश्नाः **अनिवार्याः**।

---

## खण्ड - क

**1.** अभिवादन शीलस्य किंन वर्धते? **1x10=10**

(A) आयुः (B) विद्या

(C) अर्थः (D) यशः

**2.** 'मुग्धबोध व्याकरणम्' इत्यस्य ग्रन्थस्य रचयिता कः?

(A) पाणिनिः (B) बोपदेवः

(C) पातञ्जलिः (D) कात्यायनः

**3.** कः धैर्येण दुर्गं तरति?

(A) वानरः (B) मकरः

(C) मकरी (D) सर्पः

**4.** चन्दनवृक्षः केन अन्येषां सन्तापमपहरति?

(A) पुष्पैः (B) फलैः

(C) छायया (D) वपुषा

**5.** त्रिपथगा नदी का वर्तते?

(A) यमुना (B) गोदावरी

(C) गंगा (D) सरयूः

**6.** अहो सत्ययभिहितं <u>भवता</u> इत्यत्र रेखाङ्कितपदे का विभक्तिः?

(A) तृतीया (B) चतुर्थी

(C) प्रथमा (D) षष्ठी

7. मम अपि अभीष्टमेतत् – इति अत्र 'मम' इति पदे का विभक्तिः ?

(A) प्रथमा (B) द्वितीया

(C) षष्ठी (D) पञ्चमी

8. 'प्रभाते आगत्य मत्स्यसंक्षयं करिष्यामः' इत्यत्र रेखाङ्कितपदे कः लकारः ?

(A) लृट् (B) लोट्

(C) लङ् (D) लट्

9. कथं यूयं मया विना अजीवत ? इति वाक्ये रेखांकितम् पदम् बहुवचने किं भविष्यति ?

(A) माम् विना (B) आवाभ्याम् विना

(C) अस्माभिः विना (D) अस्मान् विना

10. रिक्तस्थाने किं क्रियापदं भविष्यति ?

''कष्टेन इन्द्रियाणि प्राणम् अवदन्–भगवन्! मा __________ ।''

(A) गच्छ (B) गच्छतु

(C) गच्छत (D) गच्छति

11. 'प्रेरणा' इति पाठे बोपदेवः किमर्थं पाठशालां त्यजति ? सः पुनः पाठशालामागत्य किं करोति ? **1+1=2**

12. ''भारतवर्षे वैज्ञानिकाः 'भास्करः' इति उपग्रहयानं निर्मितवन्तः।'' इति वाक्ये किं कर्तृपदं किं च क्रियापदम् ? **1+1=2**

13. शक्रस्य गुणद्वयं लिखत। **1+1=2**

14. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नान् उत्तरत – **1x3=3**

सख्यौ : हला शकुन्तले! अवसितमण्डना असि।

परिधत्स्व क्षौमयुगलम् (शकुन्तला उत्थाय परिधत्ते)

(ततः प्रविशति कण्वः)

गौतमी : जाते! एष आनन्द परिवाहिन्या दृष्ट्या वीक्षमाणः गुरुः उपस्थितः। आचारं तावत् प्रतिपद्यस्व।

शकुन्तला : (सलज्जम्) तात! वन्दे।

**प्रश्ना :**

(i) कण्वः कीदृश्या दृष्ट्या शकुन्तलां प्रेक्षते ?

(ii) गौतमी शकुन्तलां किं कर्तुम् कथयति ?

(iii) 'परिधत्ते' इति क्रियापदस्य कर्तृपदं किम् ?

15. अधोलिखितयोः एकस्य चरित्रचित्रणं संस्कृतेन पञ्च वाक्येषु कुरुत – **1x5=5**

लवः **अथवा** दौवारिक :

**16.** यथा खनन् खनित्रेण नरो वार्यधिगच्छति। **1+1=2**

तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति। इत्यत्र

(i) नरः खनित्रेण खनन् किमधिगच्छति ?

(ii) 'विद्याम्' इति विशेष्यस्य विशेषणं किम् ?

**17.** (i) शुनः गुण द्वयं लिखत। **1+1=2**

(ii) षट्पदः पुष्पेभ्यः किं गृह्णाति ?

**18.** तपः स्वधर्मवर्तित्वं मनसो दमनं दमः इत्यत्र **1+1=2**

(i) स्वधर्मस्य दृढ़तया पालनं किम् उच्यते ?

(ii) मनसः वशीकरणं किमुच्यते ?

**19.** शरीरायासजननं कर्म व्यायाम उच्यते। लाघवं कर्मसामर्थ्यं दीप्ताऽग्निर्मेदसः क्षयः।। **1+1=2**

इत्यत्र व्यायाम् कीदृशं कर्म ? अनेन कः लाभः इति बिन्दु द्वयं लिखत।

**20.** अधोलिखितप्रश्नान् उत्तरत - **1x3=3**

अपदो दूरगामी च साक्षरो न च पण्डितः।

अमुखः स्फुटवक्ता च यो जानाति स पण्डितः।।

(i) दूरं गच्छति इति कृते किं पदमत्र प्रयुक्तम् ?

(ii) 'निरक्षरः' इत्यस्य किं विलोमपदम् अत्र प्रयुक्तम् ?

(iii) अस्मिन् श्लोके किं क्रियापदम् ?

**21.** अस्य पद्यस्य भावार्थे रिक्तस्थानपूर्तिं कुरुत। **1x3=3**

अत्रिः कुलपतिर्यत्र सूर्यवैश्वानरोपमः।

अत्र सीते ! त्वया दृष्टा तापसी धर्मचारिणी।।

<u>भावार्थः</u> अगस्त्यस्य आश्रमे कुलपतिः ___(i)___ आसीत् यः सूर्येण ___(ii)___ च समं तेजस्वी आसीत्। रामःसीतां वदति यत् अत्र त्वया तपस्विनी धर्मचारिणी ___(iii)___ दृष्टा।

**22.** रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत - **1+1=2**

(i) तौ नानाविधकथाप्रसंगेन <u>कालं</u> नयतः स्म।

(ii) <u>भार्यायाः</u> कथनेन मकरः वानरं स्वगृहम् नेतुमिच्छति।

**23.** प्राणस्य श्रेष्ठत्वम् इति पाठे इन्द्रियाणि क दा पीडितानि अभवन् ? तानि च प्राणम् किमवदन् ? **1+1=2**

**24.** ''तत्रास्तीशः कठिनां भूमिं यत्र हि कर्षति लाङ्गलिकः।'' इति पंक्तौ ईशः कुत्र अस्ति इति वर्णितम् ? **2**

**25.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नान् उत्तरत – **1x3=3**

तन्नूनं प्रभातसमये मत्स्यजीविनोऽत्र समागत्य मत्स्यसंक्षयं करिष्यन्ति, एतन्मय मनसि वर्तते। तन्न युक्तं साम्प्रतं क्षणमपि अत्र स्थातुम्। तदाकर्ण्य प्रत्युत्पम्ममति: प्राह – ''अहो सत्यममिहितं भवता। तदन्यत्र गभ्यताम्।

**प्रश्ना :**

(i) मत्स्यजीविन: प्रभाते आगत्य किं करिष्यन्ति?

(ii) प्रत्युत्पन्नमति: कस्य वचनस्य अनुमोदनं करोति?

(iii) 'करिष्यन्ति' इति क्रियापदस्य किं कर्तृपदम्?

**26.** 'रामायणम्' इति ग्रन्थ: केन लिखित:? अयोध्यां प्रति आगमनम्' इति पाठ: कस्मात् काण्डात् संगृहीत:? अत्र राम: कस्मात् स्थानात् पुन: विमानेन अयोध्यां प्रति प्रस्थानं करोति? **1x3=3**

**27.** कस्यचिदेकस्य पाठस्य सारांशं पञ्चवाक्येषु लिखत – **1x5=5**

(i) त्याज्यं न धैर्यम्

(ii) करुणापरा: हि साधव:

(iii) प्राणस्य श्रेष्ठत्वम्।

## खंड - ख

## अनुप्रयुक्त व्याकरणम्

**28.** रेखाङ्कितपदयो: सन्धिच्छेदं कृत्वा नाम लिखत – **1+1=2**

(i) <u>पितेव</u> आश्रमवासिनाम्

(ii) विराजते <u>मुनिर्बुद्धो</u>।

**29.** सन्धिं कुरुत – **1+1+1=3**

(i) यत्ते मध्यं पृथिवि! <u>यत् + च</u> नभ्यम्।

(ii) माता भूमि: <u>पुत्र: + अहं</u> पृथिव्या:

(iii) <u>किम् + नु</u> हित्वा प्रिय: भवति।

**30.** अधोलिखितेषु तालव्यवर्णौ कौ? **1+1=2**

च्, ट्, त्, इ

**31.** अधोलिखितवाक्येषु रिक्तस्थानपूर्तिं कोष्ठ के प्रदत्तशब्देन सह समुचितां विभक्तिं प्रयुज्य कुरुत – **1+1=2**

(i) ता: ये सन्तु सदा ____________ (गृह)।

(ii) तस्मात् जिघ्रन्ति __________ (पादप)।

32. रिक्तस्थानेषु अङ्कानां स्थाने संख्यावाचक पदानि लिखत – 1x3=3

(i) वृत्ते __4__ चटकाः उपविष्टाः।

(ii) मम हस्ते __5__ अङ्गुल्यः।

(iii) __3__ महिलाः कूपे जलं भरन्ति।

33. रेखाङ्कितपदयोः कौ धातू कौ च लकारौ ? 1+1=2

(i) वाचं वदत भद्रया।

(ii) स्वस्ति पन्थामनुचरेम।

34. कोष्ठके प्रदत्तधातुभ्याम् समुचिते क्रियापदे निर्माय वाक्यानि पूरयत – 1+1=2

(i) भोजनान्ते त क्रं _________ (पा + विधि)

(ii) त्रिभी रोगो न _________ (जन् लट्)

35. अधोलिखित वाक्ययोः रेखाङ्कित समस्तपदयोः विग्रहौ लिखत – 1+1=2

(i) नैर्मल्यं भावशुद्धिः च विना स्नानं न युज्यते।

(ii) हिताशी स्यात् कालभोजी जितेन्द्रियः।

36. रेखाङ्कितपदानां स्थाने समस्तपदं लिखत – 1+1=2

(i) न उद्वेगं करोति तत् वाक्यं सत्यं प्रियहितं च यत्।

(ii) मन सः प्रसादः सौम्यत्वं मौनमात्मविनिग्रहः।

37. रिक्तस्थानद्वये समुचितं प्रत्ययं प्रयुज्य वाक्यद्वयं पूरयत – 1+1=2

(i) नीडानि __________ एव स करुणापरः तानि रक्षितुम् आदिशति। (दृश् + क्त्वा)

(ii) _________ आपदं सघृण एव तु मध्यबुद्धिः। (प्र + आप् + ल्यप्)

38. रिक्तस्थानेषु उचितपदैः पूर्तिं कुरुत – 1x3=3

(i) एकस्मिन् पदातौ यत् युद्धं प्रारब्धम् तत् _________ धिक्। (अस्मद्)

(ii) चन्द्रकेतुः __________ सह प्रविशति। (सुमन्त्र)

(iii) किम् एभिः तव __________। (सैनिक)

## खंड - ग

## रचनाकौशलम्

**39.** अधोलिखित अनुच्छेदं पठित्वा प्रदत्तप्रश्नान् उत्तरत - **1x5=5**

भारतस्य शक्तिः सामर्थ्यं च अत्रत्यं प्राचीनज्ञानम् अवलम्बते। ज्ञानस्य भण्डारं संस्कृते निहितम्। ज्ञानस्य प्रकाशः अस्ति इत्यतः अयं देशः निर्दिश्यते 'भारतम्' इति। 'भा' नाम प्रकाशः। भायां रतः इति कारणतः अयं देशः भारतम्। ज्ञानस्य आधारेण एव भारतं भारतं भवितुम् अर्हति। भारतस्य पुनरुज्जीवनपर्यन्तम् अग्रे सरणमेव अस्माकं लक्ष्यम् इति। वयं सर्वे मिलित्वा संस्कृतभाषायाः प्रचाराय प्रसाराय कार्यं कुर्याम। पाठयेम संस्कृतं जगति सर्वमानवान् इति भवेत् अस्माकं प्रमुखं लक्ष्यम्। एषः एव भवेत् अस्माकं सङ्कल्पः। तदर्थं वयं स्वकीयस्य ज्ञानमपि अहर्निशं वर्धयामः इत्येव भवेत् अस्माकं निश्चयः।

**प्रश्ना :**

(i) अयं देशः 'भारतम्' इति कथम् उच्यते?

(ii) वयं सर्वे मिलित्वा किं किं कार्यं कुर्याम?

(iii) अस्माकं निश्चयः किं भवेत्?

(iv) 'अर्हति' इति क्रियापदस्य कर्तृपदं किम्?

(v) 'प्रमुखम्' इति विशेषणस्य विशेष्यं किम्?

**40.** भवती मान्या। भवत्याः सखी नवमकक्षायां प्रथम स्थानं प्राप्तवती। तदर्थं ताम् प्रति मंजूषायां प्रदत्त शब्दैः रिक्तस्थानानि पूरयित्वा अभिनन्दनपत्रं लिखत। **1x5=5**

भोपाल नगरतः

तिथिः

प्रिय सखि मान्ये!

नमस्ते। मम मनसि अतीव __(i)__ यत् त्वं __(ii)__ प्रथमं स्थानं प्राप्तवती। अद्य एव तव भ्राता माम् __(iii)__। त्वं तु प्रतिभाशालिनी, अतएव अध्यापिकानां अतीव। __(iv)__ । एवमेव अग्रे अपि प्रथमं स्थानं प्राप्तुहि इति __(v)__।

**मञ्जूषा**

| |
|---|
| सौख्यम्, प्रसन्नता, सूचितवान्, प्रार्थयामि, कक्षायां, प्रिया |


**41.** अधोलिखितविषयमधिकृत्य मञ्जूषापद सहायतया पञ्च वाक्यानि लिखत - **1x5=5**

उद्यमेनैव सिध्यन्ति कार्याणि न मनोरथैः।

**मञ्जूषा**

| |
|---|
| उद्यमेन, छात्रः, उत्तीर्णः, आलस्यं, महारिपुः, भोजनं, मुखे, नैव, जनाः, महापुरुषाः, परिश्रमेण, सुव्यवस्थितं, जीवनं, समीपस्थं, ईश्वरः, सहायकः, अनुसन्धानानि, वैज्ञानिकानि, प्रगतिः, संसारे |

**42.** अधोलिखितं चित्रं दृष्ट्वा पञ्चवाक्यानि मञ्जूषापदसहायतया लिखत – **1x5=5**



**मञ्जूषा**

| |
|---|
| यमुनायाः तटम्, जनाः, स्नानं, तीरे, कश्चन उपविष्टः, तुलसीदासः कविः, चन्दनस्य, रामचन्द्रस्य, मस्तके, ददाति, तिलकम्, पात्राणि, कटे, हस्ते धनुः, कठठे, धारयति, हसति, मालाम् शिरसः पृष्ठे |

**- o O o -**